...कोशस्य चतुर्थं सम्पुटम्

५. प्रतिष्ठाप्रकरणम् [प्रथमो भागः]

प्रतिष्ठाप्रकरणगतविषयविशेषाणां सारः

१.प्रतिष्ठाशब्दनिर्वचनादि

प्रतिष्ठाशब्दः प्रतिपूर्वकस्थाधातुनिष्पन्नः। सर्वकर्मभिः पूज्यस्य देवस्य सकलीकृतस्य प्रतिबुध्या स्थापनार्थकः। तेन इदं ज्ञायते यत् सर्वव्याप्याकाशोपमो निष्कलः परमात्मा भक्त्या सकलीकृतः भक्तस्य हृदये सन्निहितो भवति। स एव मन्त्रैः बिम्बे प्रतिष्ठापितः तत्र सन्निहितो भवति। वैष्णवपदप्राप्तिफलकं विष्णोरर्चनं बिम्बे तत्प्रतिष्ठामूलकम्। अतः प्रतिष्ठा कर्तव्या। सा च द्विविधा। सह प्रतिष्ठा पृथक् प्रतिष्ठा चेति। किञ्च प्रतिष्ठा पञ्चविधा। इष्टकानां विन्यासः, गर्भप्रक्षेपणं, मूर्धेष्टकान्यासः, ध्रुवसंस्थापनं, महाप्रतिष्ठा चेति। पञ्चप्रतिष्ठासु एतासु पञ्चाग्नीन् जुहुयात्। प्रतिष्ठा पञ्चविंशत्यंशात्मिका। तद्यथा - प्रथममङ्कुरार्पणम्। द्वितीयं सम्भारहरणं तृतीयमक्ष्युन्मोचनम् इत्यादि।

२.ध्रुवकौतुकयोरर्चनाभेदः

...चलमिति च उच्यते। यतः अचलं चलमिति

पूर्ववस्त्राभरणजातानि [illegible]
शकुनसूक्तसमन्वितं तोयधारापुष्पवृष्टियुक्तम् आचार्यः शिरसा कुम्भं सङ्गृह्य पुरतो गच्छेत्। पश्चाच्च मूर्तिधारकाः देवालयं प्रदक्षिणं कृत्वा विष्णुसूक्तेन मूर्तीः स्थापयेत्।

अष्टबन्धद्रव्याणि - शङ्खचूर्णं, मधूच्छिष्टं, लाक्षा, त्रिफलं, कार्पासं, गुग्गुलं, रक्तशिलाचूर्णं, माहिषं नवनीतं चेति।

पञ्चबन्धद्रव्याणि - माहिषं नवनीतं, लाक्षाचूर्णं, शर्कराः, कार्पासं, गुग्गुलं चेति।

त्रिबन्धद्रव्याणि - माहिषं नवनीतं, लाक्षाचूर्णं, शर्कराश्चेति।

अष्टबन्धद्रव्याणाम् अधिदेवाः यथा - शङ्खचूर्णे चन्द्रः, मधूच्छिष्टे रोहिणी, हरीतक्यां हरिः, लाक्षायाम् अग्निः, कार्पासे वायुः, गुग्गुलौ चण्डदीधितिः, शिलाचूर्णे स्कन्दः, नवनीते यमश्चेति। शङ्खचूर्णं प्रस्थं, गुग्गुलमर्धप्रस्थं, तावन्तं लाक्षाचूर्णं, पादं कार्पासं, हरीतकीमधूच्छिष्टशिलाजानपि तावतः सङ्गृह्य चूर्णस्यैकीकृतस्यार्धं नवनीतं मिश्रयित्वा सम्पेष्य मन्त्रोच्चारणपूर्वकम् अवघातम् आचरेत्। अन्यदेवालयेषु रुद्रकाल्यादिबन्धार्थम् उपयुक्तमष्टबन्धनं विष्ण्वर्थं नैव गृह्णीयात् । बिम्बपीठस्य रन्ध्रे अष्टबन्धनं योजयेत् । अष्टबन्धनहानौ दोषोऽस्ति। पूर्वस्मिन् हानौ राष्ट्रनाशनम्, आग्नेय्याम् अग्निना दाहः, याम्ये व्याधिपीडा, नैर्ऋत्यां सस्यनाशः, वारुण्यां वृष्टिनाशः, वायव्यां श्रीविनाशः, कौबेर्य्यामर्थनाशः, ऐशान्यां ग्रामनाशः, सर्वतश्च राष्ट्रनाशः, एवमष्टबन्धनहानौ पुनस्सन्धानमाचरेत्।

सूक्तादिजपः - कौतुकस्य पुरतः धान्योपरि कुम्भं सन्न्यस्य आत्मसूक्तविष्णुसूक्तश्रीसूक्तध्रुवसूक्तानि जपेत्।

मूर्धादिपादपर्यन्तम् एकाक्षरादिमन्त्रन्यासं कुर्यात्। एवमेव देव्योः परिवा
हृदये न्यसेत्।

आवाहनम् - 'इदं विष्णु' रिति मन्त्रेण कुम्भस्थं देवं शक्तियुतं कू
भगवानिति, विष्णुमावाहयामीति बिम्बस्य मूर्ध्नि स्रावयेत्। त
पुरुषाद्यावरणत्रयदेवानां श्रीभूब्रह्मशङ्करप्रभृतीनां च परिवाराणां तत्त
कुर्यात्। दीपाद्दीपमिव ध्रुववेरात् शक्तिं प्रणिधिजले ध्यायन् कौतुके अ
स्नपनोत्सवबलिबेरेषु क्रमेणावाहयेत्। कुम्भस्योदकेन कौतुकं परितः सुभद्र
आवाह्य अन्येषु परिवारबिम्बेषु तत्तन्मन्त्रैरावाहनं कुर्यात्।

मूलालयप्रतिष्ठा चेत् बालालयात् तद्बिम्बसंस्थितां शक्तिं कूर्चेन
तद्बिम्बं ध्रुवानुरूपं दोषवर्जितं स्वर्णादिकृतं चेत् कौतुकं कुर्यात्।
नद्यां वा विधिना विसर्जयेत्। यदि दारुणा कृतं तर्हि अग्निना दाहये

प्रतिष्ठानन्तरम् अर्चनोक्तवत् अर्चनं कृत्वा वेदादिघोषं कार
निवेदयित्वा होमं हुत्वा बलिं दत्वा बलिबिम्बम् आलयस्य प्रदक्षिणं क
प्रतिष्ठान्तोत्सवं कुर्यात्। नवाहं सप्ताहं पञ्चाहं त्र्यहं वा एकाहिकं वा उ
उत्सवं कारयेत्। एकाहिकं चेत् ध्वजारोहणं न कुर्यात् । उत्सवान्त
कुर्यात्। प्रतिष्ठायाम् उपयुक्तं वस्त्रधान्यादिकं सर्वं आचार्याय दद्यात्
शिष्टं दाहयेत्। अप्सु वा क्षिपेत्। स्रुवजुहूदर्वीदर्भमालादिकं तत्रै
कुम्भस्थजलेनैव यः स्नायात् आत्मानं प्रोक्षयेद्वा स सर्वपापैः प्रमुच्यते। विधि
एकविंशतिपूर्वान् तथा एकविंशतिपरांश्च कुलजान् आत्मना सह वि
क्षत्रियो विजयं कीर्तिं च लभते। सागरान्तभूभर्ता सन् अन्ते विष्णोः स

५.१८.१४ अष्टबन्धहानौ दोषः

क्रि. ३५ . १ - ४

अष्टबन्धनहीने तु पूर्वस्मिन् राष्ट्रनाशकृत् ।
आग्नेय्यामग्निना दाहः याम्ये स्याद्व्याधिपीडनम्।।

नैर्ऋत्यां सस्यनाशः स्यात् वारुण्यां वृष्टिनाशनम्।
वायव्यां श्रीविनाशः स्यात् कौबेर्य्यामर्थनाशनम्।।

ऐशान्यां ग्रामनाशश्च सर्वतो राष्ट्रनाशनम्।
बिन्दुकाकृतिभिर्भिन्ने ज्वरमारीप्रबाधनम्।।

अष्टबन्धनहानौ तु पुनस्सन्धानमाचरेत्।।

५.१८.१५ प्रतिष्ठाङ्गसूक्तादिजपः

य. २९ . १८ - २३

कौतुकप्रमुखे कुम्भं धान्योपरि सलक्षणम्।।

सन्यस्य दक्षिणे पार्श्वे चोत्तराभिमुखो बुधः।
स्वस्तिकासनमास्थाय प्राणायामं जपेत्पुनः।।

आत्मसूक्तं जपित्वान्ते मातृकां विधिवन्न्यसेत्।
ध्यायन्तो विष्णुसूक्तं च नरसूक्तमतः परम्।।

देवपादस्पृशो भूत्वा जपेयुर्ध्यानसंयुताः।
श्रीसूक्तं च जपेत्पश्चातत्तत्पादावनुस्पृशन्।।

ध्रुवस्य दक्षिणे पार्श्वे स्थित्वा चोदङ्मुखो गुरुः।
ध्रुवस्य पादौ स्पृष्ट्वैव ध्रुवसूक्तं तथैव च।।

५.१८.११ अष्टबन्धकल्पनप्रकारः

स. १४ . ३३ - ३६

किट्टवालुकयोरष्टौ लाक्षाशर्करयोश्च षट्।
अश्मनोऽपि च तावन्तौ माषगैरिकयोरुभौ।।

गुग्गुलोरेक एवं स्यादेतान् भागान् प्रपूर्णयेत्।
तैलाज्यनवनीतानि मधूच्छिष्टं च योजयेत्।।

एतत्सर्वं समालोड्य यथापाकं विपाचयेत्।
अष्टबन्धस्त्वयं प्रोक्तः प्रतिमानां मनीषिभिः।।

विधिना स्थापयेद्देवं शिल्पिभिः शास्त्रकोविदैः।
कारयेदक्षिमोक्षान्तं बिम्बं नयनबन्धनम्।।

५.१८.१२ अष्टबन्धद्रव्यनिषेधः

क्रि. ३५ . ३९ - ४१

यदि चेद् द्रव्यलोभेन अन्यदेवालयार्जितम्।
रुद्रकाल्यादिबन्धार्थम् आचितञ्चाष्टबन्धनम्।।

तन्नेष्टमष्टबन्धं तत् विष्णवर्थं नैव कारयेत्।
अज्ञानादर्थलोभाद्वा येन केनापि हेतुना।।

शिष्टद्रव्येण कुर्याच्चेत् विनश्यति न संशयः।

५.१८.१३ अष्टबन्धयोजनप्रदेशः

क्रि. ३५ . ३८

बिम्बपीठस्य रन्ध्रे तु योजयेदष्टबन्धनम्।।

५.१८.१० अष्टबन्धद्रव्यावघातः

क्रि. ३५ . ३० - ३८

पेषयित्वा तु तद्द्रव्यं निक्षिप्योलूखले गुरुः ।।

मुसलं च समादाय चार्चयित्वा विधानतः।
उलूखलेऽर्चयेत्सोमं मुसले च सुदर्शनम्।।

वैष्णवं विष्णुसूक्तं च नरसूक्तं तथैव च।
'सोमं राजान' मित्युक्त्वा 'सोमो धेनु' मिति ब्रुवन्।।

'नन्दिन्या मूल' वत्यादिमन्त्रांश्चैव चतुर्दश।
'इदं विष्णु' रिति प्रोच्य 'अग्निं दूत' मिति ब्रुवन्।।

'मरुतः परमात्मे' ति 'मरुतो गणानां ' जपन्।
'उदुत्यं चित्र' मित्युक्त्वा 'जगद्भुव' मितिं ब्रुवन्।।

'यमो दाधार' इत्युक्त्वा 'नमस्ते निर्ऋते' इति।
एतान् मन्त्रान् जपित्वा तु अवघातं समाचरेत्।।

विष्णुं च चक्रराजं च रोहिणीं च समर्चयेत्।
तद् द्रव्यं पूजयित्वा तु शूर्पे वायुं समर्चयेत्।।

ब्राह्मणांश्च समाहूय यथार्हमवघातयेत्।
ब्राह्मणानामलाभे तु शूद्रान् चक्राङ्कितांस्तथा।।

शुचीन् स्नातान् समाहूय अवघातं च कारयेत्।

५.१८.७ त्रिबन्धद्रव्याणि

क्रि. ३५. २४

माहिषं नवनीतं च लाक्षाचूर्णं च शर्कराः।
एवं त्रिबन्धमित्याहुः विपरीतं न कारयेत्।।

५.१८.८ अष्टबन्धद्रव्याणामधिदेवाः

क्रि. ३५. २५ - २७

शङ्खचूर्णे तु चन्द्रः स्यात् मधूच्छिष्टे तु रोहिणी।
हरीतक्यां हरिश्चैव लाक्षायामग्निरेव च।।

कार्पासे वायुरावाह्यः गुग्गुलौ चण्डदीधितिः।
शिलाचूर्णे स्कन्ददेवो नवनीते यमः स्मृतः।।

द्रव्येष्वेषु समावाह्य क्रमाद् द्रव्याधिदेवताः।
अष्टोपचारैरभ्यर्च्य देवानुद्वासयेत्सुधीः।।

५.१८.९ अष्टबन्धद्रव्यमानम्

क्रि. ३५ . २८ - ३०

शङ्खचूर्णं तथा प्रस्थम् अर्धप्रस्थं च गुग्गुलम्।
लाक्षाचूर्णं च तावन्तं कार्पासं पादमेव च।।

हरीतकीं मधूच्छिष्टं शिलाजं पादमेव च।
एकीकृत्य ततः सर्वं प्रस्थाद्येन च मानयेत्।।

चूर्णस्यैकीकृतस्यार्धं नवनीतं च माहिषम्।

कृत्वा यन्त्रं यथायोग्यं ध्रुवं तामवनिं तथा।
न स्पृशेत्तु यथाबेरं कुर्यादुपरि बन्धनम्।।

दृढमेवं समास्थाप्य बेरं तत्राप्रमादतः।
पश्चान्मुहूर्ते सम्प्राप्ते त्वाचार्यः शिल्पिना सह।।

तन्महाबेरयन्त्रं च शनैरेव विसृज्य वै।
स्थापयेदप्रमादेन रत्नोपरि यथादृढम्।।

५.१८.५ अष्टबन्धद्रव्याणि

क्रि. ३५. २१ , २२

शङ्खचूर्णं मधूच्छिष्टं लाक्षा त्रिफलमेव च।।

कार्पासं गुग्गुलं चैव चूर्णं रक्तशिलाकृतम्।
माहिषं नवनीतं चेत्यष्टबन्ध इति स्मृतः।।

५.१८.६ पञ्चबन्धद्रव्याणि

क्रि. ३५ . २३

माहिषं नवनीतं च लाक्षाचूर्णं च शर्कराः।
कार्पासं गुग्गुलं चैव पञ्चबन्ध इहेष्यते।।